दिनाङ्क :- 31.08.2026

प्रातः - 06:55

<u>प्रधानमंत्री उज्बेकिस्तान यात्रा</u>

भारत-उज्बेकिस्तान-देशाभ्याम् अद्य खनन- आयुर्वेद- पर्यटनार्थिकसहयोग- पर्यावरण-उच्चशिक्षादिक्षेत्रेषु परस्पर-सहयोग-संवर्धनाय सन्धिपत्राणि हस्ताक्षरितानि। देशद्वयेन त्रिंशदुत्तरद्विसहस्त्रवर्षं यावत् पञ्चार्बुद-डालरमितं व्यापारलक्ष्यं निर्धारितम्। यत् हि साम्प्रतिक –व्यापारास्य पञ्चगुणितं वर्तते। प्रधानमंत्री नरेन्द्र मोदी उज्बेकिस्तानस्य सर्वोच्च-सम्मानम् अपि अलभत। इदं सम्मानं देशद्वयस्य मध्ये सहयोग- संवर्धने तदीय-योगदानाय उपायनीकृतम्।

ताशकंद-नगरे उज्बेकिस्तानस्य राष्ट्रपतिः शावकत मिर्जियोयेवः प्रधानमन्त्रिणे नरेन्द्र-मोदिने सर्वोच्च राजकीय-सम्मानेन ऑर्डर ऑफ ओलिय दरजाली दोस्तलिक इत्यनेन सम्मानितवान्। प्रधानमंत्रिणा एषः सम्मानः भारत-उज्बेकिस्तानयोः दृढ सम्बन्धेभ्यः समर्पितः।

श्रीमोदी अवोचत् यत् सम्मानं प्राप्य असौ गौरवमनुभवति। अपि च देशद्वयं व्यापक-रणनीतिक-संरचनायाः अंतर्गतं निर्णायक-लक्ष्य-निर्धारणार्थम् अग्रे समेधयिष्यन्ते। राष्ट्रपतिना शावकत मिर्ज़ियोयेफ इत्यनेन सह प्रतिनिधिमंडल-स्तर-वार्तायां श्रीमोदी अवोचत् यत् देशद्वयं निजसम्बन्धान् व्यापक-रणनीतिकसहभागितास्तरं यावत् नयतः। अनन्तरं सहयोगस्य समस्तस्तराणां समीक्षायै विदेशमंत्रिणां समन्वयसमितेः घटना विधास्यते।

<u>नेपालजलप्लावः</u>

नेपाले जलप्लावनस्य स्थितिः अत्यन्तं चिन्तास्पदा अस्ति। भोटेकोशी-नद्याः जलस्तर-वर्धनेन प्रशासनेन रसुवा-नुवाकोट-धादिङ्ग्-मण्डलेषु संचेतना च प्रसारिता।

मध्यनेपाले आकस्मिकजलप्रलयेन मृतानां संख्या समेध्य अष्टषष्ट्युत्तर-सप्तशतं संवृत्ता। अद्यापि मृतवपुंसि सम्प्राप्यन्ते। अस्यां घटनायां सार्धद्विसहस्रजनाः विलुप्ताः सन्ति। संकटस्य पञ्चमे दिने साहाय्योद्धारकर्मचारिणः द्रुतगत्या विलुप्तानाम् अन्वेषणाय कार्यं कुर्वन्ति, अष्टसु अपि प्रभावितजनपदेषु शवः प्राप्ताः। नेपालस्य नेशनल डिज़ास्टर रिस्क रिडक्शन एंड मैनेजमेंट अथॉरिटी (NDRRMA) इत्यनेन उक्तं यत् इदानीं यावत् षडाशीत्युत्तरैकशताधिकाष्टसहस्रजनाः सुरक्षापूर्वकं निष्कासिताः। एतेषु सप्तविंशत्यधिकद्विशतं वैदेशिकनागरिकाः वर्तन्ते। विदेशमंत्रालयेन उक्तं यत् पादोनत्रिशतं भारतीयनागरिकाः विलुप्ताः सूच्यन्ते। भारतं साहाय्योद्धारकार्येषु अनवरतं साहाय्यं विदधाति। एकादश टन भारमिता साहाय्य-सामग्रीं नीत्वा चतुर्थं विमानं काठमांडू नगरं प्राप्तम्।

<u>राष्ट्रपतिः द्रौपदी मुर्मूः</u>

निफ़्ट-संस्थायाः अष्टादश-परिसराणाम् अष्टोत्तरशत-स्नातक-छात्रान् सम्बोधयितुम् अद्य राष्ट्रपतिः द्रौपदी मुर्मूः नवदेहलीं समायास्यति। एषः दीक्षान्त-समारोहः छात्राणां शैक्षणिक-प्रयासानां सिद्धि-रूपेण आयोज्यते। कार्यक्रमेऽस्मिन् केन्द्रीय-वस्त्र-मन्त्री गिरिराज सिंहः अपि उपस्थितो भविष्यति।

ओडिशा

ओडिशा-राज्ये नूतनवृष्ट्या जलप्लावन-सङ्कटः अतीव भीषणो जातः। उत्तर-क्षेत्रेषु नदीनां जलस्तरः झटिति वर्धते। ऋतु-विभागेन बालेश्वर-केझर-मयूरभञ्ज-क्षेत्रेषु अति-वृष्टिपरा संचेतना प्रख्यापिता, तटवर्ति-जनाश्च सावधानतया स्थातुं उपदिष्टाः।

।। इति वार्ताः।।